द्यूतम्। आह्वानम्। इति शब्दरत्नावली॥ पशुपक्षिद्यूतम्। सङ्गरम्। इति मेदिनी॥*॥ तस्य निषिद्धत्वं यथा,—

"द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवारयेत्।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत् तास्कर्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विज-
लिङ्गिनः॥"

इति मानवे। ९। २२१—२२४॥

समाज्ञा, स्त्री, (सम्यक् आज्ञा यस्याः।) कीर्त्तिः। इति शब्दचन्द्रिका॥ समाख्या च॥

समिकं, क्ली, शैलम्। इति शब्दरत्नावली॥ बँड़सा इति भाषा॥

समित्, स्त्री, (समीयतेऽत्रेति। सम्+इण्+क्विप्।) युद्धम्। इत्यमरः॥ (यथा, महाभारते। ५। २२। २३।

"पाण्डवश्च राजा समितीन्द्रकल्पो
युधि प्रवीरैर्बहुभिः समेतः॥")

समित्, [ध्] स्त्री, (समिध्यतेऽनयेति। इन्ध+क्विप्) अग्निसन्दीपनार्थतृणकाष्ठादिः। तत्पर्य्यायः। इन्धनम् २ एधम् ३ इध्मम् ४ एधः ५। इत्यमरः॥ समिन्धनम् ६। एतस्मिन् सूक्ष्मे किलिञ्जम्। इति शब्दरत्नावली॥*॥ होमीयसमिल्लक्षणं मत्स्यपुराणे।

"प्रादेशमात्राः समिधः सवल्काश्च पला-
शिनीः।
समिधः कल्पयेत् प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा॥"

लक्षणान्तरं यथा, छन्दोगपरिशिष्टम्।

"नाङ्गुष्ठादधिका न्यूना समित् स्थूलतया क्वचित्
न निर्म्मुक्तत्वचा चैव न सकीटा न पाटिता॥
प्रादेशात् नाधिका नोना न तथा स्याद्विशा-
खिका।
न सपत्रा न निर्वीर्य्या होमेषु च विजानता॥"

इति संस्कारतत्त्वम्॥*॥

तस्य निषिद्धलक्षणं यथा,—

"विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधा-
कृताः।
कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"

अत्र दोषो यथा,—

"विशीर्णायुःक्षयं कुर्य्याद्विदला पुत्त्रनाशिनी।
ह्रस्वा नाशयते पत्नीं वक्रा बन्धुविनाशिनी॥
कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा।
पशून् मारयते दीर्घा स्थूला चार्थविनाशिनी॥"

इति तन्त्रम्॥*॥

नवग्रहाणां समिधो यथा,—

"अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः
उडुम्बरः शमी दूर्व्वाः कुशाश्च समिधः क्रमात्॥"

इति संस्कारतत्त्वे याज्ञवल्क्यवचनम्॥

समिता, स्त्री, (सम्यक्प्रकारेण इता प्राप्ता।) गोधूमचूर्णम्। इति हेमचन्द्रः॥ सयदा इति भाषा॥ तस्या लक्षणं यथा,—

"गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः
प्रक्षिप्ताः सा विनिष्पिष्टाश्चालिताः समिता
स्मृता॥"

इति राजनिर्घण्टः॥

समितिः, स्त्री, (संयन्त्यस्यामिति। सं+इण्+क्तिन्।) सभा। यथा, महाभारते।१।२।२२४।

"प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः।
ऐक्यात्म्यं वासुदेवस्य प्रोक्तवानर्ज्जुनस्य च॥")

युद्धम्। (यथा, भागवते। २। ७। ३४।

"ये वा मृधे समितिशालिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः॥")

सङ्गः। इत्यमरमेदिनीकरौ॥ साम्यम्। इति हेमचन्द्रः॥ (सन्निपातः। इति श्रीधरस्वामी॥ यथा, भागवते। ११। २५। ८।

"प्रवृत्तिलक्षणे निष्ठः पुमान् यर्हि गृहाश्रमे।
स्वधर्म्मे चानुतिष्ठेत गुणानां समितिर्हि सा॥")

समिथः, पुं, (समेतीति। सम्+इण्+"समीणः।" उणा० २। ११। इति थक्।) अग्निः। इत्युणादिकोषः॥ युद्धम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४। २०। ८।

"गिर्वाणः समिथेषु प्रहावान्
वस्वो राशिमभिनेतासि भूरिम्॥"

अस्मिन्नर्थे क्वचित् क्लीवेऽपि दृश्यते। यथा, तत्रैव। १। ५५। ५।

"स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः॥")

आहुतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

समिद्, [ध्] स्त्री, (समिध्यतेऽनयेति। सं+इन्ध+क्विप्।) समित्। इत्यमरः॥ (यथा, मनुः। २। १७६।

"नित्यः स्नात्वा शुचिः कुर्य्यात् देवर्षिपितृ-
तर्पणम्।
देवताभ्यर्च्चनञ्चैव समिदाधानमेव च॥")

समिद्धः, पुं, (सं+इन्ध+क्तः।) प्रदीप्तः। यथा, कात्यायनः।

"योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः
मन्दाग्निरामयावी च दरिद्रश्च स जायते।
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन॥"

इति संस्कारतत्त्वम्॥

समिधः, पुं, (समिध्यते इति। सं+इन्ध+कः) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। २४। ६।

अयन्तु मामात्मभवस्तवादर्शनमारुतः।
विलापदुःखसमिधो रुदिताश्रुहुताहुतिः॥")

समिन्धनं, क्ली, (समिध्यतेऽनेनेति। सं+इन्ध+ल्युट्।) समित्। इति शब्दरत्नावली॥ (यथा भट्टिः। २। २८।

"तपोमरुद्भिर्भवतां शराग्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु॥")

समिरः, पुं, वायुः। इति हेमचन्द्रः। ४।१७२॥

समीकं, क्ली, (सम्+अलीकादयश्चेति ईकः।) युद्धम्। इत्यमरः॥ (यथा, ऋग्वेदे। ४।२४।३।

"तमिन्नरो विह्वयन्ते समीके
रिरिक्वांसस्तन्वः कृण्वतत्राम्॥")

समीकृतं, त्रि, एकीकृतम्। समानीकृतम्। कृञ्-धातौ परे समशब्दात् च्विप्रत्ययेन निष्पन्नम्॥

समीक्षं, क्ली, (सम्यगीक्ष्यतेऽनेनेति। सम्+ईक्ष+घञ्।) सांख्यशास्त्रम्। इति त्रिकाण्डशेषः॥ सम्यग्दर्शनञ्च॥

समीक्षणं, क्ली, सम्यक्प्रकारेण दर्शनम्। प्रेक्षणम्। संपूर्व्वेक्षधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (प्रकाशके त्रि। यथा, भागवते। ८।२४।५०।

"त्वमर्कदृक्सर्व्वदृशां समीक्षणो
वृतो गुरुर्नः स्वगतिं बुभुत्सताम्॥")

समीक्षा, स्त्री, (सम्+ईक्ष+गुरोश्चेत्यः। टाप्।) तत्त्वम्। बुद्धिः। निभालनम्। इति मेदिनी॥ मीमांसाशास्त्रम्। यत्नः। इति शब्दरत्नावली॥ (आत्मविद्या। इति स्वामी॥ यथा, भागवते। ११। २८। ३४।

"एवं समीक्षा निपुणा सती मे
हन्यात् तमिन्द्रं पुरुषस्य बुद्धेः॥"

सम्यग्दर्शनम्। यथा, भागवते। ३। ४। १०।

"आश्रृण्वतो मामनुरागहास-
समीक्षया विश्रमयन्नुवाच॥")

समीचः, पुं, (संयन्ति नद्यो यस्मिन्निति। सं+इण्+"समीणः।" उणा० ४। ८२। इति चट्। दीर्घश्च।) समुद्रः। इत्युणादिकोषः॥

समीचकः, पुं, मैथुनम्। इति केचित्॥

समीची, स्त्री, (संयातीति। सं+इण्+चट्। ङीप्।) मृगी। इत्युणादिकोषः॥ वन्दना। इति त्रिकाण्डशेषः॥

समीचीनं, क्ली, (सम्यगेव। सम्यक्+"विभाषाञ्चेरदिक् स्त्रियाम्।" ५। ४। ८। इति खः।) यथार्थम्। तत्पर्य्यायः। सत्यम् २ सम्यक् ३ ऋतम् ४ तथ्यम् ५ यथातथम् ६ यथास्थितम् ७ सद्भूतम् ८। इति हेमचन्द्रः॥ तद्वति, त्रि॥ (यथा, भागवते। २। ४। ५।

"समीचीनं वचो ब्रह्मन् सर्व्वज्ञस्य तवानघ।
तमो विशीर्य्यते मह्यं हरेः कथयतः कथाम्॥")

समीदः, पुं, गोधूमचूर्णम्। इति केचित्॥

समीनः, त्रि, (समामधीष्टो भृतो भूतो भावी वा। समा+"समायाः खः।" ५। १। ८५। इति खः।) वत्सरसम्बन्धी। समाशब्दात् खीन-प्रत्ययेन निष्पन्नः॥

समीनिका, स्त्री, प्रतिवर्षप्रसूता गौः। इति शब्दचन्द्रिका॥

समीपः, त्रि, (सङ्गता आपो यत्र। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अः। "द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इति ईत्।) निकटः। इत्यमरः॥ (क्लीवेऽपि दृश्यते। यथा, मनुः। २। १०४।